# Shri Gangastavanam

# श्री गङ्गास्तवनम्

## Document Information

Text title : gangAstavanam 2

File name : gangAstavanam2.itx

Category : devii, devI, nadI

Location : doc_devii

Author : viShNuprasAdapANDeya

Transliterated by : Musiri Janakiraman

Proofread by : Musiri Janakiraman, PSA Easwaran

Latest update : June 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2021

*sanskritdocuments.org*

# श्री गङ्गास्तवनम्

मुरारेः सर्वस्वं प्रचुरतपसां खण्डपरशोः
फलं भूभृद्राजा सुसमतनुजायाः प्रियसखी
विरञ्चेर्वेदार्थामृतसरसधारेभवदना-
ऽम्बिकोच्चंवर्चस्यं क्रमत इह जह्नोस्त्रिभुवने ॥ १॥

कमण्डल्वां धात्रा हरिचरणमाक्षाल्य निहिता
बृहज्ज्योतीरूपा कलुषमहिषामर्दनपटुः ।
महादुर्गा दुर्गत्यतुलवलदावानलशिखा
ततः शैवे मूर्ध्नि प्रसरसि ततोऽङ्के हिमवतः ॥ २॥

क्रमादेवं गङ्गे त्रिपथमघमाश्रित्य भवती
जगत्यां लोकानां कलिकलुषमालाप्रशमनी ।
विधत्सेऽनायासं प्रगुणपुरुषार्थंश्च चतुरो
निराशोऽयं माभूत् सकलविधिहीनः शरणदे ॥ ३॥

अघौघार्ताः क्षुद्रास्तव सलिलपानं विदधतो
निरातङ्का रङ्का अपि गलितपङ्का सुकृतिनः ।
द्रुतं भावं भावं प्रकृतिसुखसन्दोहपदवीं
लभन्तेऽध्यासीनाः सततशमसम्पत्तिमतुलाम् ॥ ४॥

पुनाना त्वं लोकान् दलितगुरुतापान् निरयतो
हठात् त्रायं त्रायं त्रिदिववनिता लालिततनून् ।
विधत्से दृष्ट्वैतत्च्छमनशमवार्ता विरहिता-
दसीया वै दूताः कलकलपसंशोकविधुराः ॥ ५॥

अहं श्रावं श्रावं विरुदशरणोऽन्ते व्यवसितो
निजोद्धारे मातर्विबुधतटिनि प्राज्यतमसाम् ।
महागारो मन्दो मदनमधनोल्लासितजटे
कथञ्चिन्नोपेक्ष्यस्तव विमृशकं यामि शरणम् ॥ ६॥

अये मातस्त्वय्यर्पितकुशलभारः सुखमहं
    शये नव्यासङ्गस्त्वदितरसमाराधनविधो ।
विधेया नोहेलेषदपि मम निस्तारसमय
    ऋते त्वत्को नाम क्षणमपि निरीक्षेत वदनम् ॥ ७॥

नभस्वान्ते लोलोर्मिप्रपदवलीम्प्राप्य पयसां
    महैनः सम्क्षोभाद्विकलविधिसम्मर्दविहितः ।
मरावाश्लिष्यन्यद् यदुपरतदेहं चलितवान्
    अहो सोऽम्ब प्राप्तः सुरपतिपुरन्तत् प्रमुदितः ॥। ८॥

ललाटेषूत्कीर्णां विधिविहित दुर्लेखि विततिं
    जनानामातार्त्तां तव सविधगानां तिरयसि ।
निशम्यैतन्मां तत्स्वशरणसमायातमधुना
    समुद्धर्तुं मातः परिकरविधित्सा भवतु मे ॥ ९॥

इति श्रीविष्णुप्रसादपाण्डेयशास्त्रीविरचितं श्रीगङ्गास्तवनं सम्पूर्णम् ॥

Encoded by Musiri Janakiraman

Proofread by Musiri Janakiraman, PSA Easwaran

*Shri Gangastavanam*

pdf was typeset on June 22, 2021

Please send corrections to *sanskrit@cheerful.com*